१. पाश्चात्यदेशेषु वैदिकसभ्यतायाः उपस्थितिः पर्यालोचनीया।

उत्तरम्—मनुसंहितायां भगवता मनुना उक्तम्—

एतद्देशप्रसूतस्य सकाशात् चाग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरण् पृथिव्याः सर्वमानवाः।।

ज्ञानदीप्तस्य भारतवर्षस्य अग्रजन्मनः ज्ञानतापसान् सकाशं पृथिव्याः सर्वे मानवाः सभ्यता-संस्कृतेः प्रथमपाठं शिक्षेरन्। महर्षे मनोः उक्तिरियं न तस्य केवलं स्वदेशप्रीतेः आत्मम्भरितायाः वा प्रकाशः, परन्तु वास्तवसत्यमिदम्। वर्तमानस्य इउरोपमहादेशः यदा आरण्यकजीवनयापने अभ्यस्तः तस्मिन् प्रागैतिहासिकयुगे एव भारतवर्षम् एकैकेन सभ्यतालोकेन उद्भासितम् अभवत्। वैदिकी सभ्यता, तस्याः पूर्वं, मेहेरगडसभ्यता-सिन्धुसभ्यता-हरप्पासभ्यता प्रभृतिभिः समग्रं विश्वम् एकदा उद्भासितमासीत्। पाश्चात्येतिहासः, ज्ञातसारम् अज्ञातसारं वा अस्मिन् विषये नीरवेऽपि भाषातात्त्विक-नृतात्त्विक-सर्वोपरि आधुनिकानां गवेषकानां नवतरया गवेषणया प्राचीनभारतवर्षष्य गौरवः क्रमशः उद्घाटितः भवति।

तपस्यायाः उज्ज्वलालोकेन भारतवर्षस्य आर्याः ऋषयः जगद्वासिनं प्रति उदात्ताह्वानं ज्ञापयन्ति—

शृण्वन्तु विश्वे अमृतस्य पुत्राः
आ ये धामानि दिव्यानि तस्थुः।
वेदाहमेतं पुरुषं महान्तम्
आदित्यवर्णं तमसः परस्तात्।।
(श्वेताश्वतर.२/५)

ज्ञानं सर्वजनीनम्। ज्ञाने एकाधिपत्यं भारतवर्षं कदापि न स्वीकरोति। अथ जगतः श्रेष्ठं ज्ञानं परमात्मज्ञानं लब्ध्वा भारतीयमनीषीवर्गः विश्वस्य प्रतिप्रान्तेषु विद्याभियाने बहिर्गतः अभवत्। स्मरणातीतकालात् भारतीयाः

ऋषयः ज्ञानवार्तया विद्यावार्तया च सह पाश्चातस्य विभिन्नप्रान्तेषु उपस्थितवन्तः।

विद्यावैभवेन सम्पद्वैभवेन च आमेरिकामहादेशः समग्रे विश्वे अन्यतमः। आमेरिकामहादेशः उत्तरदक्षिणेतिद्विधाविभक्तः। पाश्चात्येतिहासानुसारम् इतालीयः नाविकः ख्रीष्टोफार कलम्बासमहोदयः १४९२ ख्रीष्टाब्दे आमेरिकामहादेशम् आविष्कृतवान्। किन्तु तथ्यमिदं न सर्ववादिसम्मतम्। दक्षिण आमेरिकामहादेशस्य पेरुराष्ट्रस्य विख्यातगवेषकस्य Ricardo Palleres महोदयस्य वक्तव्यानुसारं कलम्बास महोदयः यथा आमेरिकामहादेशस्य आविष्कारकः न आसीत् तथा च न कोऽपि इओरोपीयः जनः। तस्य च गवेचकस्य गवेषणानुसारं प्राच्यदेशीयाः ज्ञानिनः एव आमेरिकामहादेशे प्रथमतया आगतवन्तः—....... 'The spiritually sophisticated Asians were the first to set foot on Western shores, and Asian not Europe, was the seat of Culture'.

कलम्बासमहाभागस्य अभियानस्य बहुसहस्रवर्षपूर्वात् आमेरिकामहादेशे 'रेड इण्डियान' नामकानां जनानां तथा च मायासभ्यतायाः अस्तित्वं प्रमाणितम्।

ग्रीसदेशः पाश्चात्यस्य ज्ञानतीर्थरूपेण परिचितः। पाश्चात्यपण्डितप्रवरस्य म्याक्समूलार महोदयस्य Eastern Religion ग्रन्थे प्रतिपादितं यत् ग्रीसदेशस्य एथेन्सनगरे भारतवर्षस्य ऋषिप्रवरद्वयेन सह ग्रीकपण्डितस्य सक्रेटिसमहाभागस्य आत्मतत्त्वविषये विचारविमर्षः जातः।' ख्रीष्टपूर्वे चतुर्थशतके सक्रेटिसमहाभागस्य आविर्भावः जातः।

ग्रीकदेवदेवीभिः सह भारतीयदेवदेवीनां सादृश्यं लक्ष्यणीयम्। ग्रीक् देवता जुपिटार वैदिकदेवेन इन्द्रेण सह सङ्गतिपूर्णः, हेराक्लेस च कृष्णेण सह। ऐतिहासिकस्य पि.एन् ओकमहोदयस्य तथ्यानुसारं ग्रीसदेशस्य ओलिम्पासपर्वतेन सह भारतवर्षस्य हिमालय पर्वतस्यापि सादृश्यं लक्ष्यणीयम्। हिमालयः इव ओलिम्पासपर्वतोऽपि देवानां गृहरूपेण कल्पितः।

खीष्टधर्मस्य प्रादुर्भावात् पूर्वं समग्रे विश्वे वैदिकी सभ्यता एव विस्तृता आसीत्। खीष्टजनैः स्वेषां धर्म-संस्कृतिविकाशार्थं पाश्चात्ये वैदिकसंस्कृतेः निर्विचारं ध्वंससाधनं कृतम्। ऐतिहासिकेन Godfrey Higgins महोदयेन तस्य 'The Caltic Druids ग्रन्थे उक्तम्—"The monks of Roman and Greek Churches were remnants of the sect of the Essence converted to Christinaty, and much degraded and corrupted from their excellent predecessors.'

Godfrey Higgins महोदयेन एतदपि उक्तं यत् पाश्चात्यदेशेषु खीष्टजन्मनः बहुवर्षपूर्वात् आङ्गलडिसेम्बरमासस्य पञ्चविंशतिदिवसः सौरदिवसरूपेण उद्यापितः जातः। यतः डिसेम्बरमासस्य पञ्चविंशतिदिवसात् दिनमानस्य बृद्धिः भवति। अयञ्च सौरदिवसः Druids जनानां पालनीयः उत्सवः आसीत्। Druids जनाः आर्यवंशसम्भूताः। ४५०० खीष्टपूर्वाब्दे मान्धातामहाराजेन सह युद्धे पराजिताः सन्तः द्रुह्याः पाश्चात्यभूखम्डस्य इंल्याण्ड-फ्रान्स-स्क्याण्डेभेनिया प्रभृतिषु अञ्चलेषु वसतिं स्थापितवन्तः। महाभारतस्य द्रुह्याः हि पाश्चात्ये Druid नाम्ना परिचिताः आसन्।

इउरोपमहादेशस्य जार्मानदेशः Dutchland इत्यपि परिचितः। ऐतिहासिकः Stephen Knapp महोदयः मन्यते डाच्जनाः भारतवर्षस्य दैत्यकुलोद्भवाः। दितेः गर्भजाताः महर्षेः कशपस्य पुत्राः दैत्याः अपि आर्याः। भारतवर्षमिव जार्मानदेशेऽपि स्वस्तिकचिह्नं व्यवहृतं भवति। भारतवर्षस्य स्वस्तिकः (卐) दक्षिणवर्त्म, परन्तु जार्मानदेशस्य स्वस्तिकः वामवर्त्म (卍)। Stephen Knapp महोदयस्य वक्तव्यानुसारं जार्मान देशस्य 'वुदापेष्ट' इति नगरं 'बुद्धप्रस्थः', 'हाङ्गेरी' च 'भृङ्गेरी' इति ख्यातमासीत्।

वृटेनदेशस्य Trojan जनगोष्ठी सुमेरीयार्यवंशसम्भूतः इति ऐतिहासिकस्य L.A. Waddel महोदयस्य सिद्धान्तः। आधुनिकैतिहासिकानुसारं 'इंलाण्ड' 'लण्डन' इति नाम संस्कृतसम्भूतम्—इंल्याण्ड > अङ्गुलिस्थानम्, लण्डन > नन्दनः

इति।

राशियादेशेऽपि वैदिकसंस्कृतेः प्रभावः सुस्पष्टः। भारतवर्षस्य प्राचीनमानचित्रानुसारं राशियादेशः केतुमालवर्षः रम्यकवर्षः इत्यभिहितः। तत्रस्थं स्थानम् ऋषीणां तीर्थक्षेत्ररूपेण परिगणितमासीत्। ऋषीणां निजस्वं क्षेत्रम् इत्यनुसारं तत्स्थानं 'ऋषीयः' इत्यभिहितः आसीत्। भारतवर्षस्य विभिन्नेषु प्रदेशेषु संस्कृत 'ऋ' वर्णः 'रु' इत्युच्चार्यते। ततः ऋषीयः > रुशीयः > राशिया इति विवर्तितं रूपं प्राप्यते।

संस्कृत-रुशभाषयोर्मध्ये ध्वनिगतं रूपगतञ्च निकटतरं सादृश्यं परिलक्ष्यते। यथा—

अग्निः > अगन्, माता > माति, द्वारम् > द्वेर, स्थविरा > स्थेवेया इति

एकतः धर्मीयासहिष्णुता अन्यतश्च इतिहासविकृतिः— उभययोर्मध्येऽपि पाश्चात्ये वैदिकसंस्कृतेः इत्थं निदर्शनं बहुशः प्राप्यते।

# রচনাধর্মী প্রশ্নোত্তর

१. उपनिषत्साहित्यस्य पाश्चात्ययात्रा कथं सूचिता? तत्र सम्राटपुत्रस्य दाराशिकोमहाभागस्य भूमिका पर्यालोचनीया।

उपनिषत् सनातन भारतीयार्यमनीषायाः स्वर्णफलम्। 'वसुधैव कुटुम्बकम्' इति भावनया उद्दीप्तम् उपनिषत्साहित्यम् आसुमुद्रहिमाचले भारतवर्षे यद्यपि सुपरिचितमासीत्, किन्तु पाश्चात्यजगति तत् तथैव अपरिचितम्। सुदीर्घकालं यावत् पाश्चात्यवासिनः उपनिषदां भावमाधुर्यात् दार्शनिकगौरवाच्च वञ्चिताः आसन्।

सप्तदशशतकस्य मध्यभागे विश्वज्ञानसाधनायाम् अभूतपूर्वमेकम् आलोडनं सञ्जातम्। भारतसम्राजः शाहजाहानमहाभागस्य विद्वान् सुपुत्रः राजकुमारः दाराशिकोमहाभागः पञ्चाशत्, मतान्तरे द्विपञ्चाशत् उपनिषदां पारसीकभाषायाम् अनुवादं कृतवान्। तेन च अनुवादकर्मणा मध्यप्राच्यानां देशसमूहे, ततः पाश्चात्यदेशसमूहे उपनिषद्भावधारायाः क्रमविकाशः जातः।

१६५७ खीष्टाब्दे संस्कृतपण्डितानां पार्सीपण्डितानां सहयोगेन दाराशिकोमहाभागस्य अनुवादकर्मणः प्रायतः शतवर्षात् परं अ्यानक्युइटाल डुपेरण नामकेन केनापि फरासीपण्डितेन उपनिषदां पारसीकानुवादः ल्याटिनभाषायाम् पुनरनूदितः। ऊणविंशशतकस्य प्रारम्भिके लग्ने (१८०१–१८१२) डुपेरणमहाभागस्य ल्याटिन संस्करणं प्रकाशितं जातम्। स च अनुवादः 'OUPNEK'HAT' इति नाम्ना अभिहितः अभवत्।

इतः पूर्वं अष्टादशशतकस्य उपान्तभागे स्यार उइलियम जोन्समहाभागः वङ्गप्रदेशस्य शासकस्य ओयारेण हेस्टिंसमहाभागस्य अनुप्रेरणायां कलिकातायां 'एशियाटिक सोसाइटि' नामिकां प्राच्यविद्यासंस्थां स्थापितवान्। भारतीयप्रज्ञायाः सम्यक् परिचयं प्राप्य, भारतीय भावधारया च उत्साहितः सन् जोन्समहाभागः महाकवेः कालिदासस्य अभिज्ञानशकुन्तलस्य आङ्गलानुवादं कृतवान्। अन्येषां च बहूनां संस्कतसाहित्यानामपि आङ्गलानुवादः तेन सम्पादितः।

दाराशिकोमहाभागस्य उपनिषदां पारसीकानुवादः डुपेरणमहाभागस्य ल्याटिनानुवादः जोन्समहाभागस्य संस्कृतसाहित्यानामनुवादः—अनेन त्रिवेणीसङ्गमेन भारतीयप्रज्ञायाः मूलीभूता उपनिषत् पाश्चात्यजगति सुपरिचिता जाता।

दाराशिकोमहाभागस्य उपनिषत्साहित्यस्य पारसीकानुवादः एव प्रथमवैदेशिकानुवादः। राजकुमारः दाराशिको यद्यपि इसलामधर्मावलम्बी तथापि स मुक्तचिन्तायाः अधिकारी महाशयः आसीत्। तस्मिन् कापि धर्मान्धता, साम्प्रदायिकप्रतिहिंसा वा नासीत्। प्रपितामहस्य आकवरमहाभागस्य पदाङ्कमनुसृत्य सर्वधर्मसमन्वयस्य उद्गातारूपेण दाराशिको विराजितः आसीत्।

सम्राटपुत्रः दारा गतानुगतिकशिक्षापद्धतिं प्रति निरुत्साहः आसीत्। स सदैव मुसलमान फकिर-हिन्दु-वैष्णव सन्न्यासी-खीष्टानधर्मयाजकैः परिवृतः तिष्ठति। तस्य हस्तलिपिरपि मुक्ताफलतःसदृशी आसीत्।

पितुः शाहजाहानमहाभागस्य जीवत्काले कान्दाहारविजयार्थं राजकुमारः दाराशिको ससैन्यं तत्र गतोऽभूत्। तदा तत्र मौलनाशाहनामकेन केनचित् इसलामधर्मीयपण्डितेन सह तस्य साक्षात्कारः सञ्जातः। मौलानाशाहमहोदयः दारामहाभागं हिन्दु-खीष्टान-इसलामधर्माणां समन्वयेन अद्वैतवादं व्याख्यातवान्। मौलानाशाहमहाभागात् हिन्दुशास्त्राणां रहस्यं ज्ञात्वा राजकुमारः मुग्धः जातः।

दारामहाभागः पारसीकभाषायां सुपण्डितः आसीत्। उल्लेख्यं यत् पारसीकभाषा इन्दो-इउरोपीयभाषापरिवारस्य अन्यतमा भाषा। संस्कृतभाषाम् अधिगन्तुं तेन महाभागेन बहवः हिन्दुपण्डिताः नियोजिताः। तेभ्यः संस्कृतभाषाम् अधिगम्य मोगलराजकुमारः उपनिषदां पाठे प्रवृत्तः अभवत्। ततः स उपनिषदां पारसीकभाषायाम् अनुवादकर्मणि सचेष्टः अभवत्।

अनेन अनुवादकर्मणा समग्रं पाश्चात्यजगत् उपनिषदां भावमाधुर्येण नितरां मुग्धं जातम्। फ्रान्स-जार्मान-इंल्यण्ड-आमेरिका-राशियादेषेषु उपनिषदां भावमन्दाकिनी क्रमेण अविच्छिन्नधारया प्रवाहिता जाता।

फ्रान्सदेशस्य भलतेयार–भिक्टर–काज़िन–सिलभ्याँ लेभि–रोम्याँ रोल्याँ, जार्मानदेशस्य हामवोल्डट्फ्रेडरिक श्लेगेल–आर्थार शोपेनहाओयार–फ्रेडरिक म्याक्समूलार–पल डयसेन, इंल्याण्डदेशस्य उइलियम जोन्स–चार्लस उइलकिन्स–होरस हेम्यान उइलसन–स्यार मनियर उइलियाम, आमेरिकादेशस्य एमार्सन प्रमुखाः चिन्तानायकाः उपनिषदां सर्वेश्वरवादतत्त्वेन, सर्वभूतात्मतत्त्वेन च अभिभूताः जाताः।

बहवः आङ्गलकवयः यथा इयेटस्–हेनरि डेविड थोरो–ओयाल्ट हुइटम्यान–एलियट–ओयार्डसओयार्थ–शेलिप्रमुखाः उपनिषदः आध्यात्मिकभावनया नितरां अभिभूताः आसन।

उपनिषदः सार्वजनीन प्रभावविषये जार्मानदार्शनिकप्रवरेण शोपेनहाओयार महोदयेन यत् अवदत्, तत् तस्याः मूल्यायने यथार्थम्— 'It has been the solace of my life, it will be the solace of my death'।

# वेतालपञ्चविंशतिः

वेतालपञ्चविंशतिः संस्कृतगल्पसाहित्यस्य अन्यतमः प्रसिद्धः गल्पग्रन्थः। किंवदन्तीमहाराजस्य विक्रमादित्यस्य ज्ञानगौरवम् आश्रित्य अयं गल्पग्रन्थः विरचितः। पञ्चविंशतिसंख्याकानां गल्पानां समन्वयेन रचितः अयं ग्रन्थः। कविश्च शिवदासः। ख्रीष्टीये दशम शतके ग्रन्थोऽयं विरचितः। गुणाढ्यस्य बृहत्कथामश्रित्य कविः शिवदासः वेताल पञ्चविंशतिं विरचितवान्।

राजानं विक्रमादित्यं हन्तुं शान्तशीलः नामकः कश्चित् तान्त्रिकसन्न्यासी राजसभामागत्य विक्रमादित्या प्रत्यहं फलमेकं अयच्छत्। तस्मिन् च फले रत्नमेकं लुक्कायितम् आसीत्। सः च

तान्त्रिकः शवसाधनायां सिद्धिलाभार्थं श्मशाने शिरीषवृक्षस्थितं कञ्चित् शवं कामयते स्म। शवं नीचैः आनीतुं तान्त्रिकः शान्तशीलः विक्रमादित्यस्य साहाय्यप्रार्थी अभवत्। प्रार्थीवत्सलः विक्रमादित्यः शान्तशीलस्य कथानुसारं तत्र गतः।

सः च शवः केनापि वेतालेन आश्रितः आसीत्। वेतालं निकषा विक्रमादित्यः शवं प्रार्थितवान्। वेतालः शर्तमारोपयति यत् राज्ञा तस्य केषाञ्चित् प्रश्नानां समाधानं प्रदात्यव्यम्। ततः वेतालः राजानं एकं गल्पं निर्वर्ण्य कानिचित् प्रश्नानि पृष्टवान्। उत्तरदानाय राज्ञः मौनतः विघ्निता अभवत्। तेन च शवः पुनः वृक्षलग्नः जातः। इत्थं पुनः पुनः शवानयनकाले वेतालेन जिज्ञासितानां प्रश्नानां उत्तरदानाय विक्रमादित्यस्य मौनता विघ्निता अभवत्। एवं वेतालेन कथितानां पञ्चविंशतिगल्पानां सङ्कलनं वेतालपञ्चविंशतिः।